ṚGVEDA-SARVĀNUKRAMAṆĪ

OF

KĀTYĀYANA

and

Anuvākānukramaṇī of Śaunaka

Edited

with introduction, indices etc.

By

Umesh Chandra Sharma,

M. A., Ph. D., Shastri,

Department of Sanskrit,

Shri Varshneya College, Aligarh.

VIVEKA PUBLICATIONS

ALIGARH

PRICE RS. 20·00

PUBLISHED BY MRS. VEENA SHARMA, M. A., FOR
VIVEKA PUBLICATIONS, SAMAD ROAD, ALIGARH (U. P.)
AND
PRINTED BY SHRI GANESH CHANDRA GUPTA,
AT SHIKSHAKBANDHU PRESS, DELHI GATE, ALIGARH (U. P.).

महर्षि-कात्यायन-विरचिता

ऋग्वेद-सर्वानुक्रमणी

(शौनककृताऽनुवाकानुक्रमणी च)

अलीगढ़नगरस्थ–श्रीवार्ष्णेयमहाविद्यालयस्य संस्कृतविभागे
प्राध्यापकेण एम० ए०, पी-एच० डी० इत्याद्युपाधिधारिणा
उमेशचन्द्रशर्मणा सम्पादिता

अलीगढ़नगरस्थेन
विवेकप्रकाशनेन च प्रकाशिता

प्रकाशिका—

श्रीमती वीणा शर्मा, एम० ए०,

विवेक पब्लिकेशन्स,

समद रोड,

अलीगढ़ (उ० प्र०) ।

प्रथमं संस्करणम् : १९७७

मूल्यम् : विंशतिरूप्यकाणि

मुद्रक—

श्री गणेशचन्द्र गुप्त,

शिक्षकबन्धु प्रेस,

'रामलोक', देहली गेट,

अलीगढ़ (उ० प्र०) ।

CONTENTS

INTRODUCTION

There is hardly any need to emphasise the importance of the Vedic ancillary texts for unterstanding the real meaning of the Veda and particularly the *Saṁhitās*. Among these ancillary texts, those known as *Anukramaṇīs* hold pre-eminent position in determining the various aspects of the *Saṁhitās*, *viz.*, *Ṛṣi*, (Seer or Author), *Devatā* (Deity), *Chanda* (Metre) etc. The *Anukramaṇīs*, thus, have preserved the contents of the *Saṁhitās* to a great extent[1].

Among tho authors of the *Anukramaṇīs*, the two important names are of Śaunaka and Kātyāyana. According to Saḍguru-śiṣya, author of the *Vedārthadīpikā*, a commentary on Katyāyana's *Rgveda Sarvānukramaṇī*, ten books are said to be written by Śaunaka for the preservation of the *Rgveda*. They are—(1) *Ārṣānukramaṇī*, (2) *Chandonukramaṇī*, (3) *Devatānukramaṇī*, (4) *Anuvākānukramaṇī*, (5) *Sūktānukramaṇī* (6) *Rgvidhāna* (7) *Pādavidhāna*, (8) *Bṛhaddevatta* (9) *Prātiśākhya* and (10) *Śaunaka smṛti*[2]

---

1. आविदित्वा ऋषि छन्दो दैवतं योगमेव च।
योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः॥

Sadgurusisya in the *Vedarthadipika*.

4. शौनकीया दशग्रन्थास्तदा ऋग्वेदगुप्तये।
आर्ष्यानुक्रमणीत्याद्या छान्दसी दैवती तथा॥
अनुवाकानुक्रमणी च सूक्तानुक्रमणी तथा।
ऋक्पादयोर्विधाने च बार्हद्दैवतमेव च॥
प्रातिशाख्यं शौनकीयं स्मार्तं दशमुच्यते॥

Sadgurusisya in the *Vedarthadipika*.

The *Ārṣānukramaṇī* is a small treatise which is divided in'o ten *Maṇḍalas*. It describes the seers af all the ten *Maṇḍalas* and there chronology. The *Chando'nukramaṇī* is also divided into ten *Maṇḍalas* and provides information about the metres occurring in all the ten *Maṇḍalas* of the *Rgveda*. The *Devatānukramaṇī* contains details regarding deities invoked in Rgvedic hymns and verses. The *Anuvākānukramaṇī* is a small collection of 39 verses. According to this text the *Rgveda* contains 85 *Anuvākas*, 1017 *Sūktas*, 2006 *Vargas* and 10417 *Mantras*. It has been incorporated in the present edition of the *Sarvānukramaṇī*. The *Sūktānukramaṇī* deals with and informs about the *Sūktas* (hymns) of the *Rgveda*. The *Rgvidhāna* consists of 99 verses. It describes the various gains one might get by reciting a particular *sūkta*, *varga*, *pada* or *mantra* of the *Rgveda*. The *Pādvidhāna* is an index of Rgvedic words. The *Bṛhaddevatā*[3], which is divided into ten chapters, is an exhaustive as well as indispensable sourcebook of Rgvedic deities. It contains about 1·200 verses. The *Rk-Prātiśākhya* is a Rigvedic grammar. The *Śaunaka-smṛti* is also an important work. All these works show how Śaunaka has helped the posterity in knowing the truer meaning of the *Rgveda*.

After Śaunaka, a second place of importance among the *anukramaṇīkāras* can be assigned to Kātyāyana. His *Sarvānukramaṇī* of the *Rgveda* has been one of the most popular texts with the student of Vedic literature. Its popularity derives its significance from its usefulness. This work is extremely valuable as well as indispensable for the knowledge of all the essential subjects connected with the *Rgveda*. Its aphoristic style adds to its value. Our forefathers have done well by expounding all the useful *vidyās* either in verse-form or in aphoristic style

3. Ed. by A. A. Macdonell, Harvard Oriental Series, Vols. V–VI, 1904.

to enable easy memorising. The *Sarvānukramaṇī*, which means a "catalogue of all things", gives in the form of *sūtras*, the first words of every hymn, then the number of verses, the name and family of the *ṛṣi* (seer) to whom the hymn is ascribed, the name of deities to whom the single verses are addressed, and the metre or metres in which the hymn is composed. Kātyāyana, its author, seems to be no other than the author of *Kātyāyana-Śrauta-Sūtra* belonging to the *Śukla-yajurveda*. Same Kātyāyana also seems to be the author of *Śukla-Yajuḥ-Sarvānukrama-Sūtra*. The famous grammarian Kātyāyana, who authored the *Vārtikas*, is quite a different personality. Prof. MACDONELL[4] places the author of *Sarvānukramaṇī* about the middle of the fourth century B. C. Prof. Baladeva UPADHYAYA, on the other hand, considers him to be an anterior of Pāṇini which takes him to the eighth century B. C.[5] This date seems to be more reasonable.

There is yet another work known as the *Ṛgvedānukramaṇī* of Mādhava Bhaṭṭa[6]. It also provides practically the same information about the *Ṛgveda* as given by the *Sarvānukramaṇī*. It is in verse-form and not an idependent book as such. It is a collection of relevant portions culled from to the *Ṛgveda-bhāṣya* of Mādhava Bhaṭṭa.

Among the other important *Anukramaṇīs* is one which deals with the *Śukla-Yajurveda*. It is also ascribed to Kātyāyana and styled as *Śukla-Yajurveda Sarvānukrama Sūtra*[7] It provides us, through its five chapters, with the valuable knowledge

---

4. See page VIII of the preface of his edition of the *Sarvanukramani*, Oxford, 1886.

5. संस्कृत साहित्य का इतिहास, Third Edition, Varanasi, 1968, p. 365.

6. Ed. by Dr. C. Kunhan RAJA, University of Madras, Madras, 1932.

7. Ed. by S. D. SATAVALEKAR, Aundh, 1925.

about the deities, the seers and the metres of the *Mādhyandina Saṁhitā*. An exhaustive exposition of the metres and the prescription of various *yāgas* are its special features. For the Veda of Black Yajuṣ School we come across a *Yājuṣa-Sarvānukramaṇī* ascribed to Yāska. In this text one comes across the information regarding the deities, seers and metres of the *Black Yajurveda*.

Another notable text in this series is the *Atharvaveda-Bṛhat-Sarvānukramaṇikā*.[8] This book gives information about the metres, the seers and the deities of every *sūkta* occurring in the each *kāṇḍa* of the *Atharvaveda*. It is divided into twenty *kāṇḍas* according to the *Atharvaveda-Saṁhitā*.

The *Caraṇavyūhasūtra* which is ascribed to Śaunaka contains five chapters. It provides information about the various *śākhās* of the *Ṛgveda*, the *Yajurveda*, the *Sāmaveda* and the *Atharvaveda*. A commentary written by Mahīdāsa is also available on it.

The last but not the least importent text to be taken account of in this connection is the *Nīti-Mañjarī* of Dyā Dviveda.[9] The author belonged to Gujarat. This text is full of interesting moralisations illustrated by the legends referred to in the *Ṛgveda*. These legends have been enlarged on the basis of the *Sāyaṇa–bhāṣya*, the *Bṛhaddevatā* and the *Vedārtha dīpikā*. For the perusal of the Ṛgvedic legends, this book is indispensable. Thus, it also serves as on ancillary text of the *Ṛgveda* and helps in understanding the real nature of the *Saṁhitā*.

The present edition of the *Sarvānukramaṇī* fulfils a long standing need of the scholars. Prof. A. A. Macdonell brought

---

8. Ed. by Vishvabandhu, V. V. R. I., Hoshiarpur, 1966.

9. Ed. by S. J. Joshi, Banaras, 1933.

out its first edition from Oxford in 1886 A.D. It contained, besides *Sarvānukramaṇī*, the *Anuvākānukramaṇī* of Śaunaka and the famous commentary of Saḍguruśiṣya on the former, called the *Vedārthadīpikā*. This edition was, without doubt, very authentic and valuable. For long it has been out of print which put the scholars to great hardship. It was the non-availability of the *Sarvānukramaṇī* which prompted me to bring out the present edition. It contains only the *Sarvānukramaṇī* and the *Anuvākānukramaṇī*. The text is adopted according to the Oxford Edition for which I am gratefully indebted to Prof. MACDONELL. The four indices of the *pratīkas*, the metres, the seers and the deties given in the end will certainly enhance the value of this edition. The *Chandaḥsaṅkhyā*, which is given in this edition after the *Anuvākānukramaṇī* is a short index which must be considered a *pariśiṣṭa* of *Chando'nukramaṇī*. It supplies the totals of every metre for the whole *Rgveda*. MADONELL discovered it it in some Mss. of the *Sarvnāukramaṇī* and considering the importance of its contents included it in his edition.

Acknowledgements

It was at the instance of Dr. Ram Suresh TRIPATHI, Dean of the Faculty of Arts, and Head of the Department of Sanskrit, at the Aligarh Muslim University, that the present edition was taken up for publication. He helped and encouraged me in several ways. I am greteful to him for it. I also consider it my pleasant duty to record my sincere gretefulness to Dr. R. N. DANDEKAR, Professor Emeritus of Sanskrit, University of Poona, and Dr. V.G. RAHURKAR, Reader, Centre of Advanced Study in Sanskrit in the same University, both of whom initiated me in the field of the Vedic studies. They

shall always be the guiding stars for my future academic career. My wife Mrs. Veena SHARMA, M. A., and my younger brother Girish Chandra SHARMA, M. A., Research Scholar, Department of Sanskrit, Aligarh Muslim University, worked a lot to see this book through. I thank both of them for their co-operation. I am also thankful to Mr. Ganesh Chandra GUPTA, proprietor of the Shikshakbandhu Press, for printing the book neatly and carefully.

Department of Sanskrit, *U. C. S.*
S. V. College, Aligarh.
August 15, 1977.

।। अथ भगवत्कात्यायनविरचिता सर्वानुक्रमणो ।।

।। श्री गणेशाय नमः ।।

अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीकऋक्संख्यऋषिदैवतच्छन्दांस्यनुक्रमिष्यामो यथोपदेशम् । न ह्येतज्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिः । मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविद्याजनाध्यापनाभ्यां श्रेयो[1]ऽधिगच्छतीति । एताभ्यामेवानेवंविदो यातयामानिच्छन्दांसि भवन्ति । स्थाणुं वर्च्छति[2] गर्तं वा पात्यते प्रमीयते वा पापीयान्भवतीति विज्ञायते ।। [१]

अथ ऋषयः ।।१।। शतर्चिन आद्ये मण्डलेऽन्त्ये क्षुद्रसूक्त[3]महासूक्ता मध्यमेषु माध्यमाः ।।२।। क्वचित्कथंचिदविशेषितं ब्रह्मर्षिमस्त्रियमनुक्तगोत्रमाङ्गिरसं विद्यात् ।।३।। यस्य वाक्यं स ऋषिः ।।४।। या तेनोच्यते सा देवता ।।५।। यदक्षरपरिमाणं तच्छन्दः ।।६।। अर्थेप्सव ऋषयो देवताश्छन्दोभिरुपाधावन्[4] ।।७।। तिस्र एव देवताः क्षित्यन्तरिक्षद्युस्थाना अग्निर्वायुः सूर्य इति ।।८।। एवं व्याहृतयः प्रोक्ता व्यस्ताः ।।९।। समस्तानां प्रजापतिः ।।१०।। ओंकारः सर्वदेवत्यः पारमेष्ठ्यो वा ब्राह्मो दैव आध्यात्मिकः ।।११।। तत्तत्स्थाना अन्य-

---

1. स श्रेयो ।
2. °मृच्छति ।
3. क्षुद्रसूक्ता° ।
4. °रभ्यधावन् ।

देवतास्तद्विभूतयः ॥१२॥ कर्मपृथक्त्वाद्धि पृथगभिधानस्तुतयो भवन्ति ॥१३॥ एकैव वा महानात्मा देवता ॥१४॥ स सूर्य इत्याचक्षते ॥१५॥ स हि सर्वभूतात्मा ॥१६॥ तदुक्तमृषिणा सूर्य आत्मा जगतस्तस्थुषश्चेति ॥१७॥ तद्विभूतयोऽन्या देवताः ॥१८॥ तदप्येतदृचोक्तम् ॥१९॥ इन्द्रं मित्रं वरुणमग्निमाहुरिति ॥२०॥ यथाभिधानं त्वनुक्रमिष्यामः ॥२१॥ प्रायेणैन्द्रे मरुतः ॥२२॥ राज्ञां च दानस्तुतयः ॥२३॥ [२]

अथ च्छन्दांसि ॥१॥ गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्टचत्यष्टि धृत्यतिधृतयः ॥२॥ चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि ॥३॥ ऊनाधिकेनैकेन निचृद्भुरिजौ ॥४॥ द्वाभ्यां विराट्स्वराजौ ॥५॥ पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान्व्यूहेत् ॥६॥ आद्ये तु सप्तवर्गे पादविशेषात्संज्ञाविशेषाः ॥७॥ ताननुक्रामन्त एवोदाहरिष्यामः ॥८॥ विराड्रूपा विराट्स्थानाश्च बहूना अपि त्रिष्टुभ एवेत्युद्देशः ॥९॥ तत्र दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागता इति संज्ञाः ॥१०॥ अनादेशेऽष्टाक्षराः पादाः ॥११॥ चतुष्पदाश्चर्चः ॥१२॥ [३]

प्रथमं छन्दस्त्रिपदा गायत्री ॥१॥ पञ्चकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्को वा पदपंक्तिः ॥२॥ षट्सप्तैकादशा उष्णिग्गर्भा ॥३॥ त्रयः सप्तकाः पादनिचृत् ॥४॥ मध्यमः षट्कश्चेदतिनिचृत् ॥५॥ दशकश्चेद्यवमध्या ॥६॥ यस्यास्तु षट्सप्तकाष्टकाः सा वर्धमाना ॥७॥ विपरीता प्रतिष्ठा ॥८॥ द्वौ षट्कौ सप्तकश्च[1] ह्रसीयसी ॥९॥ [४]

द्वितीयमुष्णिक् त्रिपदान्त्यो द्वादशकः ॥१॥ आद्यश्चेत्पुरउष्णिक् ॥२॥ मध्यमश्चेत्ककुप् ॥३॥ त्रैष्टुभजागतचतुष्काः ककुम्न्यंकुशिरा ॥४॥ एकादशिनोः परः षट्कस्तनुशिरा ॥५॥ मध्ये चेत्पिपीलिकमध्या ॥६॥ आद्यः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भा ॥७॥ चतुःसप्तकोष्णिगेव ॥८॥ [५]

---

1. चेति ।

तृतीयमनुष्टुप् ।।१।। पञ्च पञ्चकाः षट्कश्चैको महापदपंक्तिः ।।२।। जागतावष्टकश्च कृतिः ।।३।। मध्ये चेदष्टकः पिपीलिकमध्या ।।४।। नवकयोर्मध्ये जागतः काविराट् ।।५।। नववैराजत्रयोदशैर्नष्टरूपा ।।६।। दशकास्त्रयो विराट् ।।७।। एकादशका वा ।।८।। [६]

चतुर्थं बृहती तृतीयो द्वादशकः ।।१।। आद्यश्चेत्पुरस्ताद्‌बृहती ।।२।। द्वितीयश्चेन्न्यंकुसारिण्युरोबृहती वा स्कन्धोग्रीवी वा ।।३।। अन्त्यश्चेदुपरिष्टाद्‌बृहती ।।४।। अष्टिनोर्मध्ये दशकौ विष्टारबृहती ।।५।। त्रिजागतोर्ध्वबृहती ।।६।। त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या ।।७।। युजावष्टकावयुजौ नवैकादशिनौ बृहती विषमपदा ।।८।। चतुर्नवका बृहत्येव ।।९।। [७]

पञ्चमं पंक्तिः पञ्चपदा ।।१।। अथ चतुष्पदा ।।२।। विराड् दशकैः ।।३।। अयुजौ जागतौ सतोबृहती ।।४।। युजौ चेद्विपरीता ।।५।। आद्यौ चेत्प्रस्तारपंक्तिः ।।६।। अन्त्यौ चेदास्तारपंक्तिः ।।७।। आद्यान्त्यौ चेत्संस्तारपंक्तिः ।।८।। मध्यमौ चेद्विष्टारपंक्तिः ।।९।। [८]

षष्ठं त्रिष्टुप् त्रैष्टुभपदा ।।१।। द्वौ तु जागतौ यस्याः सा जागते जगती ।।२।। त्रैष्टुभे त्रिष्टुप् ।।३।। वैराजौ जागतौ चाभिसारिणी ।।४।। नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थाना ।।५।। एकादशिनस्त्रयोऽष्टकश्च विराड्‌रूपा ।।६।। द्वादशिनस्त्रयोष्टकश्च ज्योतिष्मती ।।७।। यतोऽष्टकस्ततो ज्योतिः ।।८।। चत्वारोऽष्टका जागतश्च महाबृहती ।।९।। मध्ये चेद्यवमध्या ।।१०।। आद्यौ दशकावष्टकास्त्रयः पंक्त्युत्तरा विराट्पूर्वा वा ।।११।। [९]

सप्तमं जगती जागतपदा ।।१।। अष्टिनस्त्रयः स्वौ च द्वौ महासतोबृहती ।।२।। अष्टकौ सप्तकः षट्को दशको नवकश्च षळष्टका वा महापंक्तिः ।।३।। [१०]

अथ प्रगाथाः ।।१।। बृहतीसतोबृहत्यौ बार्हतः ।।२।। ककुप् चेत्पूर्वा काकुभः ।।३।। महाबृहतीमहासतोबृहत्यौ महाबार्हतः ।।४।। बृहती

विपरीते विपरीतोत्तरः ।।५।। अनुष्टुब्गायत्र्यौ चानुष्टुभौऽनुष्टुम्मुखास्तृचा इत्युक्ते ।।६।। [११]

सूक्तसंख्यानुवर्तंत आन्यस्याः सूक्तसंख्यायाः ।।१।। ऋषिश्चान्यस्मादृषेरवाविशिष्टः ।।२।। तुहिह्वैतच्छब्दविशिष्टान्यृषिदैवतच्छन्दांसि द्वित्रिचतुःपञ्चषट्सूक्तभांजि यथासंख्यम् ।।३।। अनिरुक्ता संख्या विंशतिः ।।४।। अनादेशे त्विन्द्रो देवता ।।५।। त्रिष्टुप् छन्दः ।।६।। प्रगाथा बार्हताः ।।७।। विंशतिका द्विपदा विराजः ।।८।। तदर्धमेकपदाः ।।९।। द्विर्द्विपदास्त्वृचः[1] समामनन्ति ।।१०।। अयुक्ष्वन्त्या द्विपदैव ।।११।। मण्डलादिष्वाग्नेयमैन्द्रात् ।।१२।। त्रिष्टुबन्तस्य सूक्तस्य शिष्टा[2] जगत्यः ।।१३।। आदौ गायत्रं प्राग्धैरण्यस्तूपीयात् ।।१४।। [१२]

।। इति द्वादशकाण्डी तु परिभाषा प्रवर्णिता ।।

1. तृचः ।
2. शेषा ।

अथ प्रथमं मण्डलम्

[१]अग्निं नव मधुच्छन्दा वैश्वामित्रः। [२]वायो वायव्यैन्द्रवायवमैत्रावरुणास्तृचाः। [३]अश्विना द्वादशाश्विनैन्द्रवैश्वदेवसारस्वतास्तृचाः। सप्तैताः प्रउगदेवताः। [४]सुरूपकृत्नुं दशैन्द्रम्। [५]आ तु। [६]युञ्जन्त्यादहेत्येताः षण्मारुत्यो वीळु चिदिन्द्रेणेत्यैन्द्रचौ च। [७]इन्द्रमित्। [८]एन्द्र सानसिम्। [९]इन्द्रेहि। [१०]गायन्ति द्वादशानुष्टुभं तु। [११]इन्द्रमष्टौ जेता माधुच्छन्दसः। [१२]अग्निं द्वादश मेधातिथिः काण्व आग्नेयमग्निनेति पादो द्व्यग्निदैवतो निर्मथ्याहवनीयौ। [१३]सुसमिद्ध इतीध्मः समिद्धो वाग्निस्तनूनपान्नराशंस इळो बर्हिर्देवीर्द्वार उषासानक्ता देव्यौ होतारौ प्रचेतसौ तिस्रो देव्यःसरस्वतीळाभारत्यस्त्वष्टा वनस्पतिः स्वाहाकृतय इति प्रत्यृचं देवताः। एतदाप्रीसूक्तम्। एतेनान्यान्युक्तदैवतानि। एकादशकानि तु नाराशंसान्याप्रशब्दोक्तान्यतनूनपांति। [१४]ऐभिर्वैश्वदेवम्। [१५]इन्द्रं सोममृतव्यम्। तत्रैन्द्री मारुती त्वाष्ट्र्याग्नेय्यैन्द्री मैत्रावरुणी चतस्रो द्रविणोदस आश्विन्याग्नेयीत्यृतुदेवताः सर्वत्र। [१६]आ त्वा नव। [१७]इन्द्रावरुणयोरैन्द्रावरुणं युवाकु पादनिचृतौ। [१८]सोमानमिति पञ्च ब्राह्मणस्पत्याश्चतुर्थ्यामिन्द्रश्च सोमश्च पञ्चम्यां दक्षिणा चान्याः सादसस्पत्या नाराशंसी वान्त्या। [१९]प्रति त्यमाग्निमारुतम् ॥१॥

[२०]अयमष्टावार्भवम्। [२१]इह षळैन्द्राग्नम्। [२२]प्रातर्युजा सैका चतस्र आश्विन्यस्तथा सावित्र्य आग्नेय्यौ द्वे देवीनामेकैकेन्द्राणीवरुणान्यग्नायीनां द्यावापृथिव्ये पार्थिवी षड्वैष्णव्योऽतो देवा दैवी वा। [२३]तीव्राश्चतुर्विंशतिर्वायव्यैकैन्द्रवायव्यौ मैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाः शिष्टा[1] आप्योऽन्त्याध्यर्धाग्नेय्यप्स्वंतः पुरउष्णिक्

1. शेषा।

परानुष्टुप्तिस्रश्चान्त्या एकविंशी प्रतिष्ठा । [24]कस्य पञ्चोनाजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातो वारुणं तु त्रैष्टुभमादौ काय्याग्नेय्यौ सावित्रस्तृचो गायत्रोऽस्यान्त्या भागी वा । [25]यच्चित्सैका । [26]वसिष्व दशाग्नेयं तु । [27]अश्वं सप्तोना गायत्रेऽन्त्या दैवी त्रिष्टुप् । [28]यत्र यावा नव षळनुष्टुबादि यच्चिद्ध्यौलूखल्यौ परे मौसल्यौ च प्रजापतेर्हरिश्चन्द्रस्यान्त्या चर्मप्रशंसा वा । [29]यच्चित्सप्त पाङ्क्तम् । [30]आ वो द्व्यधिकास्माकं पादनिचृच्छश्वत्त्रिष्टुप्परौ तृचावाश्विनोषस्यौ । [31]त्वमग्ने द्व्यूना हिरण्यस्तूप आग्नेयं त्रिष्टुबन्त्याष्टमीषोळश्यौ च । [32]इन्द्रस्य पञ्चोना ॥२॥

[33]एत । [34]त्रिश्चिद्द्वादशाश्विनं नवम्यन्त्ये[1] त्रिष्टुभौ । [35]ह्वयाम्येकादश सावित्रं नवमी जगत्याद्या च लिंगोक्तदैवतपादा । [36]प्र वो विंशतिः कण्वो घौर[2] आग्नेयं प्रागाथमूर्ध्व ऊ षु यौप्यौ । [37]क्रीळं पञ्चोना मारुतं हि गायत्रं तु । [38]कद्ध । [39]प्र यद्दश प्रागाथं तु । [40]उत्तिष्ठाष्टौ ब्राह्मणस्पत्यम् । [41]यं रक्षन्ति नव वरुणमित्रार्यम्णां मध्ये तृच आदित्येभ्यो गायत्रं हि । [42]सं पूषन्दश पौष्णम् । [43]कद्रुद्राय नव रौद्रं तृतीया मैत्रावरुणी चान्त्यस्तृचः सौम्योऽन्त्यानुष्टुप् । [44]अग्ने षळूना प्रस्कण्वः काण्व आग्नेयं तु प्रागाथमाद्यो द्वृचोऽश्व्युषसां च । [45]त्वमग्ने दशानुष्टुभमर्धर्चोऽन्त्यो दैवः । [46]एषो पञ्चोनाश्विनं तु गायत्रम् ॥३॥

[47]अयं दश प्रागाथं तु । [48]सह षोळशोषस्यं तु । [49]उषश्चतुष्कमानुष्टुभं तु । [50]उदु त्यं सप्तोना सौर्यं नवाद्या गायत्र्योऽन्त्यस्तृचो रोगघ्न उपनिषत् । [51]अभि त्यं पञ्चोना सव्यो द्वित्रिष्टुबन्तम् । अंगिरा इन्द्रतुल्यं पुत्रमिच्छन्नभ्यध्यायत्सव्य इतीन्द्र एवास्य पुत्रोऽजायत । [52]त्यं सु त्रयोदश्यन्त्ये त्रिष्टुभौ । [53]न्यू ष्वेकादशान्त्ये त्रिष्टुभौ । [54]मा नोऽन्त्या त्रिष्टुप् षष्ठ्यष्टमी नवमी च । [55]दिवश्चिदष्टौ जागतं

1. °म्यन्ते ।

2. घोर ।

हि । [५६]एष प्र षट् । [५७]प्र मंहिष्ठाय । [५८]नू चिन्नव नोधा गौतम आग्नेयं हि चतुस्त्रिष्टुबन्तम् । [५९]वया इत्सप्त वैश्वानरीयम् । [६०]बर्हिनं पञ्च । [६१]अस्मा इदु षोळश ।।४।।

[६२]प्रसप्तोना । [६३]त्वं नव । [६४]वृष्णे पञ्चोना मारुतं त्रिष्टुबन्तम् । परमाग्नेयमैन्द्रात् । [६५]पश्वा दश पराशरः शाक्त्यो द्वैपदं तत् । [६६]रयिः । [६७]वनेषु । [६८]श्रीणन् । [६९]शुक्रः । [७०]वनेमैकादश । [७१]उप प्र दश । [७२]नि काव्या । [७३]रयिर्न । [७४]उपप्रयन्तो नव गोतमो राहूगणो गायत्रं तु । [७५]जुषस्व पञ्च । [७६]का ते । [७७]कथा । [७८]अभि त्वा गायत्रं तु । [७९]हिरण्यकेशो द्वादशाद्यौ तृचौ त्रैष्टुभौष्णिहौ पूर्वोऽग्नये वा मध्यमाय । [८०]इत्था षोळशैन्द्रं पांक्तं हि ।।५।।

[८१]इन्द्रो नव । [८२]उपो षु षड् जगत्यन्तम् । [८३]अश्वावति जागतम् । [८४]असावि विंशतिः षळनुष्टुभ औष्णिहपांक्तगायत्रत्रैष्टुभास्तृचाः प्रगाथः । [८५]प्र ये द्वादश मारुतं ह पञ्चम्यन्त्ये त्रिष्टुभौ । [८६]मरुतो दश गायत्रम् । [८७]प्रत्वक्षसः षड् जागतम् । [८८]आ विद्युन्मद्भिराद्यान्त्ये प्रस्तारपंक्ती पञ्चमी विराड्रूपा । [८९]आ नो दश वैश्वदेवं तु पञ्चाद्याः सप्तमी च जगत्यः षष्ठी विराट्स्थाना । [९०]ऋजुनीती नव गायत्रमन्त्यानुष्टुप् । [९१]त्वं सोम त्र्यधिका सौम्यं पञ्चम्यादि गायत्र्यो द्वादशोष्णिक् च । [९२]एता उ त्या द्व्यूनोषस्यं चतुर्जगत्यादि षळुष्णिगन्तं तृचोऽन्त्य आश्विनः । [९३]अग्नीषोमौ द्वादशाग्नीषोमीयमाद्यास्तिस्रोऽनुष्टुभ उपान्त्यास्तिस्रो गायत्र्योऽष्टमी जगती वा । [९४]इमं षोळश कुत्स आग्नेयं तद्द्वित्रिष्टुबन्तं पूर्वो देवास्त्रयः पादा दैवास्तन्नो मित्रोऽर्धर्चो लिंगोक्तदेवतो[1] यद्देवत्यं वा सूक्तम् ।।६।।

[९५]द्वे एकादशौषसाय वाग्नये । [९६]स प्रत्नथा नव द्रविणोदसे । [९७]अप नोऽष्टौ शुचये गायत्रम् । [९८]वैश्वानरस्य तृचं वैश्वानरीयम् । [९९]जातवेदस एका जातवेदस्यमेतदादीन्येकभूयांसि सूक्तसहस्रमेतत्कश्यपार्षम् । [१००]स यो वृषैकोना वार्षागिरा ऋज्राश्वांबरीषसहदेव-

1. लिंगोक्तदेवत्यो, °दैवतो ।

भयमानसुराधसः । [१०१]प्र मंदिन एकादश कुत्स आद्या गर्भस्राविण्युपनिषच्चतुस्त्रिष्टुबन्तम् । [१०२]इमां तेऽन्त्या त्रिष्टुप् । [१०३]तत्तेऽष्टौ । [१०४]योनिर्नव । [१०५]चन्द्रमा एकोनाप्त्यस्त्रितो वा वैश्वदेवं हि पांक्तमन्त्या त्रिष्टुबष्टमी महाबृहती यवमध्या । [१०६]इन्द्रं मित्रं सप्त त्रिष्टुबन्तम् । [१०७]यज्ञस्तृचम् । [१०८]य इन्द्राग्नी सप्तोनैन्द्राग्नं तु । [१०९]वि ह्यष्टौ । [११०]ततं नवार्भवं तु पंचम्यन्त्ये त्रिष्टुभौ । [१११]तक्षन्पञ्चान्त्या त्रिष्टुप् । [११२]ईळे पञ्चाधिकाश्विनमाद्यौ पादौ लिंगोक्तदेवतावन्त्ये त्रिष्टुभौ ॥७॥

[११३]इदं विंशतिरुषस्यं द्वितीयोऽर्धर्चो रात्रेश्च । [११४]इमा एकादश रौद्रं द्वित्रिष्टुिबन्तम् । [११५]चित्रं षट् सौर्यम् । [११६]नासत्याभ्यां पञ्चाधिका कक्षीवान्दैर्घतमस उशिक्प्रसूत आश्विनं वै । [११७]मध्वः । [११८]आ वामेकादश । [११९]आ वां रथं दश जागतम् । [१२०]का राधद्द्वादशान्त्या दुःस्वप्ननाशिन्याद्या गायत्री द्वितीया ककुप्तृतीयाचतुर्थ्यौ काविराण्नष्टरूप्यौ पञ्चमी तनुशिरा षष्ठ्यक्षरैरुष्णिग्विष्टारबृहती कृतिर्विराट् तिस्रो गायत्र्यः । [१२१]कदित्था पञ्चोना वैश्वदेवं वा ॥८॥

[१२२]प्र वो वैश्वदेवमा वो विराड्रूपे । [१२३]पृथुः सप्तोनोषस्यं तु । [१२४]उषा उच्छन्ती । [१२५]प्राता रत्नं सप्त स्वनयस्य दानस्तुतिरुपजगत्यौ । [१२६]अमन्दानिति कक्षीवान्दानतुष्टः पञ्चभिर्भावयव्यं तुष्टावान्त्ये अनुष्टुभौ भावयव्यरोमशयोर्दंपत्योः संवादः । [१२७]अग्निमेकादश परुच्छेपो दैवोदासिराग्नेयं तु पारुच्छेपं सर्वमात्यष्टं तत्रातिधृतिः षष्ठी । [१२८]अयं जायताष्टौ । [१२९]यं त्वमेकादश षष्ठ्यैन्दवी प्रप्रा वोऽतिशक्वर्याविष्टिरन्त्या ।[१३०]एंद्र याहि दशान्त्या त्रिष्टुप् । [१३१]इन्द्राय सप्त । [१३२]त्वया षड्युवन्तमैन्द्रापार्वतोऽर्धर्चः । [१३३]उभे सप्तादौ त्रिष्टुप्तिस्रोऽनुष्टुभो गायत्री धृतिः । [१३४]आ त्वा षड्वायव्यं त्वन्त्याष्टिः । [१३५]स्तीर्णं नव चतुर्थ्याद्याः पञ्चैन्द्र्यश्चोपान्त्ये अष्टी । [१३६]प्र सु सप्त मैत्रावरुणं त्वन्त्ये लिंगोक्तदेवत्ये अन्त्या त्रिष्टुप् ॥९॥

[१३७]सुषुम तृचमतिशाक्वरम् । [१३८]प्रप्र चतुष्कं पौष्णम् । [१३९]अस्तु

श्रौषळेकादश वैश्वदेवी मैत्रावरुण्याश्विन्यस्तिस्र ऐन्द्रयाग्नेयी मारुत्यै-न्द्राग्नी बार्हस्पत्या वैश्वदेव्यन्त्या त्रिष्टुप्पञ्चमी बृहती वैश्वदेव-मेतदेवमन्यासामपि सूक्तप्रयोगे वैश्वदेवत्वं सूक्तभेदप्रयोगे यल्लिंगं सा देवता। [१४०]वेदिषदे सप्तोना दीर्घतमा औचथ्य आग्नेयं तु द्वित्रिष्टु-बन्तं तु त्रिष्टुब्दशमी वा। [१४१]बळित्था। [१४२]समिद्ध आप्रिय आनु-ष्टुभमन्त्यैन्द्री। [१४३]प्र तव्यसीमष्टावाग्नेयं तु तत्त्रिष्टुबन्तम्। [१४४]एति प्र सप्त जागतम्। [१४५]तं पृच्छत पञ्चान्त्या त्रिष्टुप्। [१४६]त्रिमूर्धानम्। [१४७]कथा। [१४८]मथीद्यत्। [१४९]महः स वैराजम्। [१५०]पुरु तृच-मौष्णिहम्। [१५१]मित्रं नव मैत्रावरुणं हि जागतं मैत्र्याद्या। [१५२]युवं सप्त। [१५३]यजामहे चतुष्कम्। [१५४]विष्णोः षड्वैष्णवं हि। [१५५]प्र वो जागतं त्वैन्द्रश्चाद्यस्तृचः। [१५६]भव पञ्च। [१५७]अबोधि षळाश्विनं त्वन्त्ये त्रिष्टुभौ ॥१०॥

[१५८]वसू अन्त्यानुष्टुप्। [१५९]प्र द्यावा पञ्च द्यावापृथिवीयं तु जागतं तु। [१६०]ते हि। [१६१]किमु श्रेष्ठः षळूनार्भवं त्रिष्टुबन्तम्। [१६२]मा नो द्व्यधिकाश्वस्तुतिस्तु तृतीयाषष्ठ्यौ जगत्यौ। [१६३]यदक्रन्दः सप्तोना। [१६४]अस्य द्विपञ्चाशदल्पस्तवं त्वेतत्संशयोत्थापनप्रश्नप्रतिवाक्यान्यत्र प्रायेण ज्ञानमोक्षाक्षरप्रशंसा च पञ्चपादं साकंजानां यद्गायत्रेऽयं स शिङ्क्ते सप्तार्धगर्भा गौरीरिति जगत्यः। एतदन्तं वैश्वदेवं तस्याः समुद्रा इति वाचः समुद्रा आपोऽक्षरं सा प्रस्तारपंक्तिः शकमयमिति शकधूम उक्षाणं पृश्निमिति सोमस्त्रयः केशिन इत्यग्निः सूर्यो वायुश्च केशिन-श्चत्वारि वाग्वाच इन्द्रं मित्रं सौर्य्यो द्वादशेति संवत्सरसंस्थं कालचक्र-वर्णनं यस्ते सरस्वत्यै यज्ञेन साध्येभ्यः परानुष्टुप्सौरी पर्जन्याग्नि-देवता वान्त्या सरस्वते वा सूर्याय वा। [१६५]कया पञ्चोना संवादोऽ-गस्त्येन्द्रमरुतां तृतीयाद्ययुजो मरुतां वाक्यमन्त्यस्तृचोऽगस्त्यस्य शिष्टा इन्द्रस्यैकादशी च मरुत्वांस्त्विन्द्रो देवता ॥११॥

[१६६]तन्न्वगस्त्यो मारुतं हि द्वित्रिष्टुबन्तं मित्रावरुणयोर्दीक्षित-योरुर्वशीमप्सरसं दृष्ट्वा वासतीवरे कुम्भे रेतोऽपतत्ततोऽगस्त्यव-सिष्ठावजायेताम्। [१६७]सहस्रमेकादशाद्यैन्द्री। [१६८]यज्ञायज्ञा दश

त्रिष्टुबन्तम् । [१६९]महोऽष्टौ द्वितीया विराट् । [१७०]न नूनं पञ्चागस्त्येनैन्द्रे हविषि मरुतामुद्यत इन्द्रागस्त्ययोः संवाद ऐन्द्रस्तत्राद्या तृतीया चेन्द्रवाक्यं चतुर्थी वादौ बृहती तिस्रोऽनुष्टुभः । [१७१]प्रति वः षण्मारुतं तु चतस्रोऽन्त्या मरुत्वतीयाः । [१७२]चित्रस्तृचं गायत्रम् । [१७३]गायत्सप्तोना । [१७४]त्वं राजा दश । [१७५]मत्सि षळानुष्टुभं तु त्रिष्टुबन्तं त्वाद्या स्कन्धोग्रीवी । [१७६]मत्सि नः । [१७७]आ चर्षणिप्राः पञ्च । [१७८]यद्ध स्या । [१७९]पूर्वीः षड् जायापत्योर्लोपामुद्राया अगस्त्यस्य च द्वृचाभ्यां रत्यर्थं संवादं श्रुत्वान्तेवासी ब्रह्मचार्यन्त्ये बृहत्यादी अपश्यत् । [१८०]युवोर्दशाश्विनं वै । [१८१]कदु नव । [१८२]अभूदिदमष्टौ षष्ठ्यन्त्ये त्रिष्टुभौ । [१८३]तं युंजाथां षट् ॥१२॥

[१८४]ता वाम् । [१८५]कतरैकादश द्यावापृथिवीयम् । [१८६] आ नो वैश्वदेवम् । [१८७]पितुं न्वन्नस्तुतिर्गायत्रं त्वाद्यानुष्टुब्गर्भा तृतीया पञ्चम्याद्याश्च तिस्रोऽनुष्टुभोऽन्त्या च बृहती वा । [१८८]समिद्ध आप्रियः । [१८९]अग्ने नयाष्टावाग्नेयम् । [१९०]अनर्वाणं बार्हस्पत्यम् । [१९१]कंकतः षोळशोपनिषदानुष्टुभमप्तृणसौर्यं विषशंकावानगस्त्यः प्राब्रवीद्दशम्याद्यास्तिस्रो महापंक्तयो महाबृहती च ।

॥ शतर्चिनां मण्डलं तु समाप्तं प्रथमं त्विति ॥

अथ द्वितीयं मण्डलम्

य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत्स गृत्समदो द्वितीयं मण्डलमपश्यत्। [1]त्वमग्ने जागतं तु। [2]यज्ञेन सप्तोना। [3]समिद्ध एकादशाप्रं सप्तमी जगती। [4]हुवे नव सोमाहुतिर्भार्गवो ह। [5]होताष्टावानुष्टुभम्। [6]इमां मे गायत्रं हि। [7]श्रेष्ठं षट्। [8]वाजयन्नवान्त्यानुष्टुप्। ॥१३॥

[9]नि होता। [10]जोहूत्रः। [11]श्रुधि सैकेन्द्रं विराट्स्थानमृतेऽन्त्याम्। [12]यो जातः पञ्चोना। [13]ऋतुः सप्तोनान्त्या त्रिष्टुप्। [14]अध्वर्यवो द्वादश। [15]प्र घ दश। [16]प्र वो नवान्त्या त्रिष्टुप्। [17]तदस्मै द्वित्रिष्टुबन्तम्। [18]प्रातः। [19]अपायि। [20]वयं ते स नो विराड्रूपा। [21]विश्वजिते षट् त्रिष्टुबन्तम्। [22]त्रिकद्रुकेषु चतुष्कमष्ट्याद्यतिशाक्वरमन्त्याष्टिर्वा। [23]गणानामेकोना ब्राह्मणस्पत्यं ह बार्हस्पत्यास्तु दृष्टलिङ्गाः पञ्चदश्यन्त्ये त्रिष्टुभौ ॥१४॥

[24]सेमां षोळशान्त्या त्रिष्टुब्द्वादशी च सैन्द्री च। [25]इन्धानः पञ्च जागतं तु। [26]ऋजुश्चतुष्कम्। [27]इमास्त्र्यूना कूर्मो गार्त्समदो हि वादित्येभ्यः। [28]इदमेकादश वारुणम्। [29]धृतव्रताः सप्त वैश्वदेवम्। [30]ऋतमेकादश जगत्यन्तं षष्ठ्यैन्द्रासौमी सरस्वति त्वमिति सारस्वतोऽर्धर्चो यो नो बार्हस्पत्या तं वो मारुती। [31]अस्माकं सप्त वैश्वदेवं त्रिष्टुबन्तम्। [32]अस्य मेऽष्टौ जागतं त्र्यनुष्टुबन्तं द्यावापृथिव्यैका द्वे ऐन्द्र्यौ त्वाष्ट्र्यौ वा द्वे द्वे राकासिनीवाल्योरन्त्या लिंगोक्तदेवता। [33]आ ते पञ्चोना रौद्रम्। [34]धारावरा मारुतं त्रिष्टुबन्तम्। [35]उपेमपोनप्त्रीयम्। [36]तुभ्यं षळृतव्यं तु जागतं तु ॥१५॥

[37]मन्दस्व । [38]उदु ष्य एकादश सावित्रम् । [39]ग्रावाणेवाष्टावाश्विनम् । [40]सोमापूषणा षट् सोमापौष्णमन्त्योऽर्धर्चोऽप्यदितेः । [41]वायो सैका गायत्रमुक्ता देवताः प्रउगेणाद्ये तु तृचेऽन्त्यैन्द्रवायवी द्यावापृथिव्योऽन्त्यस्तृचो हाविर्धानो वा तृतीयः पादो वाग्नेयोऽबितमेऽनुष्टुभौ बृहती च । [42]कनिक्रदत्तृचम् । [43]प्रदक्षिणिज्जागतं मध्येऽतिशक्वर्यष्टिर्वा । एताभ्यामृषिरध्वनि वाश्यमानं शकुन्तं तुष्टाव ।

॥ इति गार्त्समदं द्वितीयं मण्डलं समाप्तम् ॥

अथ तृतीयं मण्डलम्

कुशिकस्त्वैषीरथिरिन्द्रतुल्यं पुत्रमिच्छन्ब्रह्मचर्यं चचार तस्येन्द्र एव गाथी पुत्रो जज्ञे गाथिनो विश्वामित्रः स तृतीयं मण्डलमपश्यत् । [१]सोमस्य त्र्यधिका । [२]वैश्वानराय पञ्चोना वैश्वानरीयं तु जागतं तु । [३]वैश्वानरायैकादश । [४]समित्समिदाप्रियः । [५]प्रत्यग्निः । [६]प्र कारवः । इत्याग्नेययोरन्यासामपि निपातो दृश्यते ॥१६॥

[७]प्र ये । [८]अञ्जन्ति यूपस्तुतिः षष्ठ्याद्याभिर्बह्वोऽन्त्या व्रश्चिन्त्यष्टमी वैश्वदेवी वा तृतीयासप्तम्यावनुष्टुभौ । [९]सखायो नव बार्हतं त्रिष्टुबन्तम् । [१०]त्वामग्न औष्णिहम् । [११]अग्निर्होता गायत्रं तु । [१२]इन्द्राग्नी ऐन्द्राग्नम् । [१३]प्र वः सप्त ऋषभस्त्वानुष्टुभम् । [१४]आ होता । [१५]वि पाजसा कात्य[1] उत्कीलस्तु । [१६]अयमग्निः षट् प्रागाथम् । [१७]समिध्यमानः पञ्च कतो वैश्वामित्रस्तु । [१८]भवा नः । [१९]अग्निं होतारं गाथी ह । [२०]अग्निमुषसमाद्यन्त्ये वैश्वदेव्यौ । [२१]इमं न उपाद्ये अनुष्टुभौ विराड्रूपा सतोबृहती चान्त्या । [२२]अयं स उपान्त्यानुष्टुप्पुरीष्येभ्योऽग्निभ्यः । [२३]निर्मथितो देवश्रवा देववातश्च भारतौ तृतीया सतोबृहती । [२४]अग्ने सहस्व गायत्रमाद्यानुष्टुप् ।[२५]अग्ने दिवो वैराजमुपान्त्याग्नेन्द्री । [२६]वैश्वानरं नव तृचौ वैश्वानरीयमारुतौ जागतौ द्वृच आत्मस्तुतिर्वा पूर्वात्मगीतान्त्योपाद्यायस्तुतिः । [२७]प्र वः पञ्चोना गायत्रं त्वृतव्या वाद्या । [२८]अग्ने जुषस्व षट्तृतीया द्युष्णिक्त्रिष्टुब्जगत्यः । [२९]अस्तीदं षोळशाद्या चतुर्थीदशमी द्वादश्योऽनुष्टुभः षष्ठ्येकादश्युपान्त्ये च जगत्यः पञ्चम्यृत्विग्भ्यो वा ॥१७॥

1. कात्यो

[30]इच्छन्ति द्व्यधिकैन्द्रम् । [31]शासत्कुशिको विश्वामित्र एव वा श्रुतेः । [32]इन्द्रं सोमं द्व्यूना । [33]प्र पर्वतानां सप्तोना संवादो नदीभिर्विश्वामित्रस्योत्तितीर्षोस्तत्र नदीवाक्यं चतुर्थीषष्ठ्यष्टमीदशम्यः षष्ठीसप्तम्योस्त्विन्द्रस्तुतिरन्त्यानुष्टुप् । [34]इन्द्रः पूर्भिदेकादश । [35]तिष्ठा हरी । [36]इमामी षूपान्त्यां घोरोऽपश्यत्सा निर्दहेच्छस्यमानेति श्रूयते । [37]वार्त्रहत्याय गायत्रमन्त्यानुष्टुप् । [38]अभि तष्टेव दश प्रजापतिः स वैश्वामित्रो वाच्यो वा द्वौ वा तौ न वैकोऽपि । [39]इन्द्रं मतिर्नव ॥१८॥

[40]इन्द्र त्वा गायत्रं हि । [41]आ तू नः । [42]उप नः । [43]आ याह्यष्टौ । [44]अयं ते पञ्च बार्हतं तु । [45]आ मन्द्रैः । [46]युध्मस्य । [47]मरुत्वान् । [48]सद्यो ह । [49]शंसा महाम् । [50]इन्द्रः स्वाहा । [51]चर्षणीधृतं द्वादशाद्यान्त्यौ तृचौ जागतगायत्रौ । [52]धानावन्तमष्टौ पूर्वार्धं गायत्रं षष्ठी जगती । [53]इन्द्रापर्वता चतुर्विंशतिराद्यैन्द्रापार्वती पञ्चदश्यादि द्वे वाचे ससर्पर्यं चतस्रो रथाङ्गस्तुतयोऽन्त्या अभिशापास्ता वसिष्ठद्वेषिण्यो न वसिष्ठाः शृण्वन्ति । दशमीषोळश्यौ जगत्यौ त्रयोदशी गायत्री द्वादशीविंशीद्वाविंश्योऽनुष्टुभोऽष्टादशी बृहती । [54]इमं महे द्व्यधिकोक्तगोत्रः प्रजापतिर्हि वैश्वदेवं ह । [55]उषसः ॥१९॥

[56]न ताष्टौ । [57]प्र मे षट् । [58]धेनुर्नवाश्विनम् । [59]मित्रो मैत्रं चतुर्गायत्र्यन्तम् । [60]इहेव वः सप्तार्भवं जागतं तृचोऽन्त्य ऐन्द्रश्च । [61]उष उषस्यम् । [62]इमा उ द्व्यूनैन्द्रावरुणबार्हस्पत्यपौष्णसावित्रसौम्यमैत्रावरुणास्तृचा अन्त्यौ जमदग्न्यार्षो वां चतुर्थ्याद्या गायत्र्यः ।

॥ तृतीयं मण्डलं समाप्तम् ॥

अथ चतुर्थं मण्डलम्

वामदेवो गौतमश्चतुर्थं मण्डलमपश्यत् । [1]त्वां ह्यग्ने विंशतिरत्यतिजगतीधृतय आद्या उपाद्याश्चतस्रो वारुण्यश्च वा । [2]यो मर्त्येषु । [3]आ वः षोळशाद्या रौद्री । [4]कृणुष्व पञ्चोना राक्षोघ्नम् ॥२०॥

[5]वैश्वानराय वैश्वानरीयम् । [6]ऊर्ध्व ऊ ष्वेकादश । [7]अयमिहादौ जगती पञ्चानुष्टुभः । [8]दूतं वोऽष्टौ गायत्रं तु । [9]अग्ने मृळ । [10]अग्ने तमद्य पदपांक्तं पञ्चमी महापदपंक्तिरन्त्योष्णिक् चतुर्थो षष्ठ्युपान्त्या वा सप्तम्याः पञ्चकौ मुख्यौ तृतीयः सप्तकौ नवकश्चाष्टम्याः पञ्चकः पादचतुष्कः सप्तकस्त्रैष्टुभश्च । [11]भद्रं षट् । [12]यस्त्वाम् । [13]प्रत्यग्निः पञ्च लिङ्गोक्तदैवतं त्वेके । [14]प्रत्यग्निः । [15]अग्निर्होता दश गायत्रमृषिर्बोधदित्याभ्यां सोमकं साहदेव्यमभ्यवदत्पराभ्यामस्याश्विनावायुरयाचत । [16]आ सत्यः सैकेन्द्रम् । [17]त्वं महाँ असिक्न्यामेकपदा । [18]अयं पन्थाः सप्तोना संवाद इन्द्रादिति वामदेवानाम् ॥२१॥

[19]एवैकादश । [20]आ नः । [21]आ यातु । [22]यन्नः । [23]कथोपान्त्यास्तिस्र ऋतदेव्यो वा । [24]का सुष्टुतिरुपान्त्यानुष्टुप् । [25]को अद्याष्टौ । [26]अहं मनुः सप्ताद्याभिस्तिसृभिरिन्द्रमिवात्मानमृषिस्तुष्टावेन्द्रो वात्मानं परा नवाष्टौ वा श्येनस्तुतिः । [27]गर्भे नु पञ्चान्त्या शक्वरी । [28]त्वा युजैन्द्रासोमं वा । [29]आ नः स्तुतः । [30]नकिश्चतुर्विंशतिर्दिवश्चित्तृच उषस्यश्च गायत्रं ह्यष्टम्यन्त्ये अनुष्टुभौ । [31]कया पञ्चोनाभी षु पादनिचृत् । [32]आ तू नश्चतुर्विंशतिरन्त्याभ्यामिन्द्राश्वौ स्तुतौ ॥२२॥

[३३]प्र ऋभुभ्य एकादशार्भवं वै। [३४]ऋभुर्विभ्वा। [३५]इहोप नव। [३६]अनश्वोऽन्त्या त्रिष्टुप्। [३७]उप नोऽष्टौ चतुरनुष्टुबन्तम्। [३८]उतो हि दश दाधिक्रं हि द्यावापृथिव्याद्या। [३९]आशुं षळन्त्यानुष्टुप्। [४०]दधिक्राव्णः पञ्च चतस्रोऽन्त्या जगत्योऽन्त्या सौरी। [४१]इन्द्रा को वामेकादशैन्द्रावरुणं तु। [४२]ममद्विता दश त्रसदस्युः पौरुकुत्स्यः षळाद्या आत्मस्तवः[1]। [४३]क उ श्रवत्सप्त पुरुमीळ्हाजमीळ्हौ सौहोत्रौ त्वाश्विनं हि। [४४]तं वाम्। [४५]एष स्य त्रिष्टुबन्तम्। [४६]अग्रं वायव्याद्यैन्द्रवायवं तु गायत्रम्। [४७]वायो चतुष्कमाद्या वायव्यानुष्टुभं तु। [४८]विहि पञ्च वायव्यम्। [४९]इदं वां षळैन्द्राबार्हस्पत्यं गायत्रम्। [५०]यस्तस्तम्भैकादश बार्हस्पत्यमन्त्यें एन्द्रचौ चोपान्त्या जगती ॥२३॥

[५१]इदमुषष्यं तु। [५२]प्रति ष्या सप्त गायत्रम्। [५३]तद्देवस्य सावित्रं तु जागतम्। [५४]अभूद्देवः षट् त्रिष्टुबन्तम्। [५५]को वो दश वैश्वदेवं त्रिगायत्र्यन्तं तु। [५६]मही सप्त द्यावापृथिवीयम्। [५७]क्षेत्रस्याष्टौ तिस्रः क्षैत्रपत्याः शुनायैका परा पुरउष्णिक् सान्त्या च शुनासीराभ्यामुपान्त्ये सीतायै ते चानुष्टुभावाद्या चतुर्थ्यौ च। [५८]समुद्रादेकादशाग्नेयं जगत्यन्तं सौर्यं वापं वा गव्यं वा घृतस्तुतिर्वा ॥

॥ इति चतुर्थं मण्डलं समाप्तम् ॥

---

1. °संस्तवः।

अथ पञ्चमं मण्डलम्

नमोऽत्रिभ्यो भौमोऽत्रिः पञ्चमे मण्डलेऽनुक्तगोत्रमात्रेयं विद्यात्पंक्त्यन्तस्य च सूक्तस्य शेषमानुष्टुभम्। [१]अबोधि द्वादश बुधगविष्ठिरौ। [२]कुमारं कुमारो वृशो वा जान[1] उभौ वा शक्वर्यन्तं कं वीत्यृचोस्तु वृश एव। [३]त्वमग्ने वसुश्रुतः। [४]त्वामग्न एकादश। [५]सुसमिद्धायाप्रं गायत्रम्। [६]अग्निं त दश पांक्तम्। [७]सखाय इषः पंक्त्यन्तम्। [८]त्वामग्ने सप्त जागतम् ॥२४॥

[९]त्वामग्ने गयोऽन्त्यापञ्चम्यौ पंक्ती। [१०]अग्न ओजिष्ठमन्त्याचतुर्थौ[2] च। [११]जनस्य षट् सुतम्भरो जागतम्। [१२]प्राग्नये। [१३]अर्चन्तो गायत्रं तु। [१४]अग्निं स्तोमेन। [१५]प्र वेधसे पञ्चाङ्गिरसो धरुणः। [१६]बृहत्पूरुः पंक्त्यन्तं ह। [१७]आ यज्ञैः। [१८]प्रातर्मृक्तवाहा द्वितः। [१९]अभ्यवस्था वव्रिर्गायत्र्यावनुष्टुभौ। [२०]यमग्ने चतुष्कं प्रयस्वन्तः पंक्त्यन्तं ह। [२१]मनुष्वत्सप्तसः[3]। [२२]प्र विश्वसामन्विश्वसामा[4]। [२३]अग्ने द्युम्नो विश्वचर्षणिः। [२४]अग्ने त्वं गौपायना लौपायना वा बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्चैकर्चा द्वैपदम्। [२५]अच्छा वो नव वसूयव आनुष्टुभम्। [२६]अग्ने गायत्रमन्त्या लिंगोक्तदेवता। [२७]अनस्वन्ता षट् त्रैवृष्णपौरुकुत्स्यौ द्वौ त्र्यरुण त्रसदस्यू राजानौ भारतश्चाश्वमेधोऽन्त्यास्तिस्रोऽनुष्टुभो नात्मात्मने दद्यादिति

1. जारः।
2. चतुर्थी च।
3. मनुष्वच्छसः।
4. प्र विश्वसामा।

सर्वास्त्वाग्नि केचिदन्त्यैन्द्राग्नी । [२८]समिद्धो विश्ववारात्रेयी त्रिष्टुब्जगती त्रिष्टुबनुष्टुब्गायत्र्यौ । [२९]त्र्यर्यमा पञ्चोना गौरिवीतिः शाक्त्य ऐन्द्रमुशना यदौशनसो वा पादः । [३०]क्व स्य बभ्रुर्ऋणञ्चयोऽप्यत्र राजा स्तुतः । [३१]इन्द्रो रथाय सप्तोनावस्युरुग्रमिति कौत्स्योशनसौ वा पादौ परैन्द्राकौत्सी । [३२]अदर्दर्द्वादश गातुः ॥२५॥

[३३]महि दश प्राजापत्यः संवरणः । [३४]अजातशत्रुं नव त्रिष्टुबन्तम् । [३५]यस्तेऽष्टौ प्रभूवसुरांगिरसः पंक्त्यन्तम् । [३६]स आ गमत् षट् तृतीया जगती । [३७]सं भानुना पञ्चात्रिः । [३८]उरोरानुष्टुभम् । [३९]यदिन्द्र पंक्त्यन्तम् । [४०]आ याहि नव त्र्युष्णिगाद्यन्त्यानुष्टुम्मध्ये च सा सौरी तदादीतिहासः स्तुतकर्मत्वादत्रिर्देवतैव[1] । [४१]को नु विंशतिर्वैश्वदेवं वै तत् षोळश्याद्यतिजगत्यावंत्यैकपदा । [४२]प्र शंतमा द्व्यूनैकादशी रौद्री । [४३]आ धेनवस्त्र्यूना । ऐतयोरुपान्त्यैकपदा । [४४]तं प्रत्नथा पञ्चोना काश्यपोऽवत्सारोऽन्ये च ऋषयोऽत्र दृष्टलिङ्गा द्वित्रिष्टुबन्तम् । [४५]विदा एकादश सदापृणः । [४६]हयोऽष्टौ प्रतिक्षत्रोऽन्त्यो द्वृचो देवपत्नीस्तवोऽन्त्या त्रिष्टुब्द्वितीया च ॥२६॥

[४७]प्रयुञ्जती सप्त प्रतिरथः । [४८]कदु पञ्च प्रति भानुर्जागतम् । [४९]देवं वः प्रतिप्रभोऽन्त्या तृणपाणिः । [५०]विश्वः स्वस्त्यात्रेयः पंक्त्यन्तम् । [५१]अग्ने पञ्चोना चतस्रो गायत्र्यः षळुष्णिहस्तिस्रो जगत्यस्त्रिष्टुभो वान्त्ये अनुष्टुभौ । [५२]प्र श्यावाश्व त्र्यूना श्यावाश्वो मारुतं ह तत्पंक्तिः षष्ठ्यन्त्ये च । [५३]को वेद षोळश ककुब्बृहत्यनुष्टुप्पुरउष्णिक् ककुप्सतोबृहत्यौ गायत्री सतोबृहती ककुभौ गायत्री सतोबृहत्यौ ककुप्सतोबृहती । [५४]प्र शर्धाय पञ्चोना जागतमुपान्त्या त्रिष्टुप् । [५५]प्र यज्यवो दशान्त्या त्रिष्टुप् । [५६]अग्ने नव बार्हतं तृतीयासप्तम्यौ सतोबृहत्यौ । [५७]आ रुद्रासोऽष्टौ द्वित्रिष्टुबन्तम् । [५८]तमु । [५९]प्र वस्त्रिष्टुबन्तम् । [६०]ईळे द्विजगत्यन्तमाग्नेयं च वा । [६१]के ष्ठैकोना गायत्रं श्यावाश्वोऽत्र वैददश्वी तरन्तपुरुमीळ्हौ दाल्भ्यं रथवीतिं

1. अत्रिरेव देवः ।

मरुतश्च दानतुष्टः प्रशशंस बुद्ध्वा च तरन्तमहिषीं शशीयसीं पञ्चम्यनुष्टुम्नवमी सतोबृहती । [६२]ऋतेन नव श्रुतविन्मैत्रावरुणं वै तत् ॥२७॥

[६३]ऋतस्य सप्तार्चनाना जागतम् । [६४]वरुणं पंक्त्यन्तं तु । [६५]यश्चिकेत षड्रातहव्यः । [६६]आ चिकितानानुष्टुभं तु । [६७]बळित्था पञ्च यजतः । [६८]प्र वो गायत्रम् । [६९]त्री रोचना चतुष्कमुरुचक्रिः । [७०]पुरूरुणा गायत्रं तु । [७१]आ नस्तृचं बाहुवृक्तः । [७२]आ मित्र औष्णिहम् । [७३]यदद्य दश पौर आश्विनं तदानुष्टुभं तु । [७४]कूष्ठः । [७५]प्रति नवावस्युः पांक्तम् । [७६]आ भाति पञ्चात्रिः । [७७]प्रातर्यावाणा । [७८]अश्विनौ नव सप्तविध्रिस्त्र्युष्णिगादि चतुर्थी त्रिष्टुप्पञ्चानुष्टुभोऽन्त्याः पञ्च गर्भस्राविण्युपनिषत् । [७९]महे दश सत्यश्रवा उषस्यं तु पांक्तम् । [८०]द्युतद्यामानं षट् । [८१]युञ्जते पञ्च श्यावाश्वः सावित्रं तु जागतम् । [८२]तत्सवितुर्नव गायत्रमाद्यानुष्टुप् । [८३]अच्छ दशात्रिः पार्जन्यमुपाद्यास्तिस्रो जगत्य उपान्त्यानुष्टुप् । [८४]बळित्था तृचं पार्थिवमानुष्टुभम् । [८५]प्र सम्राजेऽष्टौ वारुणम् । [८६]इन्द्राग्नी षळैन्द्राग्नमानुष्टुभं विराट्पूर्वान्तम् । [८७]प्र वो नवैवयामरुन्मारुतमतिजागतम् ॥

॥ इति पञ्चमं मण्डलम् ॥

अथ षष्ठं मण्डलम्

बार्हस्पत्यो भरद्वाजः षष्ठं मण्डलमपश्यत् । [१]त्वं ह्यग्ने सप्तोना ॥२८॥

[२]त्वं ह्येकादशानुष्टुभं शक्वर्यन्तम् । [३]अग्नेऽष्टौ । [४]यथा होतः । [५]हुवे सप्त । [६]प्र नव्यसा । [७]मूर्धानं वैश्वानरीयं हि द्विजगत्यन्तम् । [८]पृक्षस्यान्त्या त्रिष्टुप् । [९]अहश्च । [१०]पुरो वो द्विपदान्तम् । [११]यजस्व षट् । [१२]मध्ये । [१३]त्वद्विश्वा । [१४]अग्ना य आनुष्टुभं शक्वर्यन्तम् । [१५]इममू ष्वेकोना वीतहव्य ऋषिर्वा जागतं प्राग्दशम्यास्तृतीया-पञ्चदश्यौ शक्वर्यौ षष्ठ्यतिशक्वर्यनुष्टुब्बृहत्या उपान्त्ये । [१६]त्वमग्ने-ऽष्टाचत्वारिंशद्गायत्रं वर्धमानाद्या षष्ठी च सप्तविंश्यनुष्टुप्त्रिष्टुप्पूर्वे चान्त्ये ॥२९॥

[१७]पिब पञ्चोनैन्द्रं त्रैष्टुभं द्विपदान्तम् । [१८]तमु ष्टुहि । [१९]महा-न्तसप्तोना । [२०]द्यौर्न वि पिप्रोर्विराट् । [२१]इमा उ द्वादश नवमेका-दश्यौ वैश्वदेव्यौ । [२२]य एक एकादश । [२३]सुत इद्दश । [२४]वृषा । [२५]या ते नव । [२६]श्रुधी नोऽष्टौ । [२७]किमस्यान्त्या चायमानस्याभ्या-वर्तिनो दानस्तुतिः । [२८]आ गावो गव्यं द्वितीयैन्द्री वान्त्यस्य पादोऽन्त्यानुष्टुब्जागतस्तृचो द्वितीयादिः ॥३०॥

[२९]इन्द्रं षट् । [३०]भूयः पञ्च । [३१]अभूरेकः सुहोत्रस्तु चतुर्थी शक्वरी । [३२]अपूर्व्या । [३३]य ओजिष्ठः शुनहोत्रस्तु । [३४]सं च त्वे । [३५]कदा नरस्तु । [३६]सत्रा । [३७]अर्वाक् । [३८]अपात् । [३९]मन्द्रस्य । [४०]इन्द्रं पिब । [४१]अहेळमानः । [४२]प्रत्यस्मै चतुष्कमानुष्टुभं बृहत्यन्तम् ।

[४३]यस्यौष्णिहम् । [४४]यो रयिवश्चतुर्विंशतिः शंयुर्बार्हस्पत्यो ह्यादौ षळनुष्टुभस्तिस्रश्च विराजो मध्यमैव वासाम् । [४५]य आनयत्त्रिंशद्गायत्रं पुरूतममतिनिचृदन्त्यानुष्टुप्तृचेऽन्त्ये बृबुस्तक्षा दैवतम् । [४६]त्वामिद्धि षळूना प्रागाथम् । [४७]स्वादुरेकत्रिंशद्गर्गः पञ्चादौ सौम्योऽगव्यूत्यर्धर्चो लिङ्गोक्तदेवतः[1] प्रस्तोक इति त्रिष्टुबनुष्टुब्गायत्री द्विपदा साञ्जयस्य प्रस्तोकस्य दानस्तुतिः परौ तृचौ रथदुन्दुभिदेवत्यावैन्द्रोऽन्त्योऽर्धर्चो युजानो बृहती त्रिष्टुम्महि द्विपदा दिवस्पृथिव्या जगती ॥३१॥

[४८]यज्ञायज्ञा द्व्यधिका शंयुस्तृणपाणिकं पृश्निसूक्तं प्रगाथौ बृहती महासतोबृहती महाबार्हतबार्हतौ प्रागाथावित्याग्नेय्यः काकुभः प्रगाथः पुरउष्णिग्बृहत्यतिजगतीति मारुत्योऽन्त्यास्तिस्रो वासां लिङ्गोक्तदेवताः काकुभः प्रगाथः पुरउष्णिग्बृहतीति पौष्ण्यो बृहती महाबृहती यवमध्यान्त्यानुष्टुम्मारुत्योऽन्त्या द्यावाभूम्योर्वा पृश्नेर्वा । [४९]स्तुषे पञ्चोन ऋजिश्वा ह वैश्वदेवं ह शक्वर्यन्तम् । [५०]हुवे वः । [५१]उदु त्यत्षोळश त्र्युष्णिगनुष्टुबन्तम् । [५२]न तत्यूना सप्तम्याद्याः षड्गायत्र्यश्चतुर्दशी जगती । सुहोत्रादयोऽनुक्तगोत्रा भारद्वाजाः पौत्रा बृहस्पतेर्दौःषन्तेर्वा भरतस्य । [५३]वयं दश पौष्णं तद्गायत्रं वै यां पूषन्ननुष्टुप् । [५४]सं पूषन् । [५५]एहि वां षट् । [५६] य एनमन्त्यानुष्टुप् । [५७]इन्द्रा न्वैन्द्रं च । [५८]शुक्रं चतुष्कं द्वितीया जगती । [५९] प्र नु दशैन्द्राग्नं तु बार्हतं चतुरनुष्टुबन्तम् । [६०]श्नथत्पञ्चोना गायत्रं तु त्रित्रिष्टुबादि त्रिष्टुब्बृहत्यनुष्टुबन्तम् । [६१]इयं षळूना सारस्वतं त्रिजगत्यादि जगतीत्रिष्टुबन्तम् ॥३२॥

[६२]स्तुष एकादशाश्विनं तु । [६३]क्व त्यैकपदान्तं त्रैष्टुभम् । [६४]उदु श्रिये षळुषस्यं तु । [६५]एषा स्या । [६६]वपुर्न्वेकादश मारुतम् । [६७]विश्वेषां मैत्रावरुणम् । [६८]श्रुष्टी वामैन्द्रावरुणमुपान्त्ये जगत्यौ । [६९]सं वामष्टावैन्द्राविष्णवम् । [७०]घृतवती षट् द्यावापृथिवीयं जागतम् ।

1. °दैवतः ।

७१उदु ष्य सावित्रं त्रिष्टुबन्तम् । ७२इन्द्रासोमा पञ्चैन्द्रासोमम् । ७३यो अद्रिभित्तृचं बार्हस्पत्यम् । ७४सोमारुद्रा चतुष्कं सौमारौद्रम्[1] । ७५जीमूतस्येवैकोना पायुर्भारद्वाजः संग्रामाङ्गान्यृक्शोऽभितुष्टाव वर्म धनुर्ज्यामार्त्नी इषुधिं जगत्यर्धे सारथिमर्धे रश्मीनश्वान् रथं रथगोपाञ्जगत्यां लिङ्गोक्तदेवता द्वाभ्यामिषू प्रतोदं हस्तघ्नं द्वाभ्यामिषूः पराः पंक्त्यादयो लिङ्गोक्तदेवताः संग्रामाशिषोऽन्त्यानुष्टुबृजीत आलाक्तेति च द्वे द्वे ॥

॥ इति षष्ठं मण्डलम् ॥

1. सोमारौद्रम् ।

अथ सप्तमं मण्डलम्

सप्तमं मण्डलं वसिष्ठोऽपश्यत् । [१]अग्निं पञ्चाधिका विराजोऽष्टादशाद्याः ॥३३॥

[२]जुषस्वैकादशाप्रम् । [३]अग्निं वो दश । [४]प्र वः । [५]प्राग्नये नव वैश्वानरीयं तु । [६]प्र सम्राजः सप्त । [७]प्र वो देवम् । [८]इन्धे । [९]अबोधि षट् । [१०]उषो न पञ्च । [११]महान् । [१२]अगन्म तृचम् । [१३]प्राग्नये वैश्वानरीयम् । [१४]समिधा बृहत्यादि । [१५]उपसद्याय पञ्चोना गायत्रम् । [१६]एना वो द्वादश प्रागाथम् । [१७]अग्ने भव सप्त द्वैपदं त्रैष्टुभम् । [१८]त्वे ह पञ्चाधिकैन्द्रं सुदासः पैजवनस्यान्त्याश्चतस्रो दानस्तुतिः । [१९]यस्तिग्मश्रृङ्ग एकादश ॥३४॥

[२०]उग्रो दश । [२१]असावि । [२२]पिब नव वैराजमृतेऽन्त्याम् । [२३]उदु षट् । [२४]योनिः । [२५]आ ते । [२६]न सोमः पञ्च । [२७]इन्द्रं नरः । [२८]ब्रह्मा णः । [२९]अयं सोमः । [३०]आ नः । [३१]प्र वो द्वादश गायत्रं त्रिविराळन्तम् । [३२]मो षु सप्ताधिका प्रागाथं तृतीया द्विपदा सौदासैरग्नौ प्रक्षिप्यमाणः शक्तिरन्त्यं प्रगाथमालेभे सोऽर्धर्चे उक्तेऽदह्यत । तं पुत्रोक्तं वसिष्ठः समापयतेति शाट्यायनकं वसिष्ठस्यैव हतपुत्रस्यार्षमिति ताण्डकम् । [३३]श्वित्यञ्चः षळूना संस्तवो वसिष्ठस्य सपुत्रस्येन्द्रेण वा संवादः । [३४]प्र शुक्रा पञ्चाधिका वैश्वदेवं ह्याद्या एकविंशतिर्द्विपदा अब्जामहेरर्धर्चे उत्तरोऽहिर्बुध्न्याय । [३५]शं नः पञ्चोना शान्तिः ॥३५॥

---

1. आरेभे ।

[३६]प्र ब्रह्म नव। [३७]आ वोऽष्टौ। [३८]इदु ष्य सावित्रमन्त्ये वाजिन्यौ भगमिति भागो वार्धर्चः। [३९]ऊर्ध्वः सप्त वैश्वदेवं तु। [४०]ओ श्रुष्टिः। [४१]प्रातर्भागं जगत्याद्या लिङ्गोक्तदेवतान्त्योषस्या। [४२]प्र ब्रह्माणः षड्वैश्वदेवं तु। [४३]प्र वः पञ्च। [४४]दधिक्रां दाधिक्रं जगत्याद्या लिङ्गोक्तदेवता। [४५]आ देवश्चतुष्कं सावित्रम्। [४६]इमा रौद्रं त्रिष्टुबन्तम्। [४७]आपो यमापम्। [४८]ऋभुक्षण आर्भवमन्त्या वैश्वदेवी वा। [४९]समुद्रज्येष्ठा आपम्। [५०]आ मां मैत्रावरुण्याग्नेयी वैश्वदेवी नदीस्तुतिर्जागतमन्त्यातिजगती शक्वरी वा। [५१]आदित्यानां तृचमादित्यं तु। [५२]आदित्यासः। [५३]प्र द्यावा द्यावापृथिवीयम्। [५४]वास्तोष्पते वास्तोष्पत्यम्। [५५]अमीवहाष्टौ वास्तोस्पत्याद्या गायत्री शेषास्त्र्युपरिष्टाद्बृहत्यादयोऽनुष्टुभः प्रस्वापिन्य उपनिषत्। [५६]क ईं पञ्चाधिका मारुतं हाद्या एकादश द्विपदाः। [५७]मध्वः सप्त। [५८]प्र साकमुक्षे षट्। [५९]यं त्रायध्वे द्वादश त्रिप्रगाथादि नवम्याद्या गायत्र्योऽन्त्यानुष्टुब्रौद्री मृत्युविमोचनी ॥३६॥

[६०]यदद्य मैत्रावरुणं तु वै सौर्याद्या। [६१]उद्वां सप्त। [६२]उत्सूर्यः षळाद्यास्तिस्रः सौर्यः। [६३]उद्वेतीति चार्धपञ्चमाः। [६४]दिवि पञ्च। [६५]प्रति वाम्। [६६]प्र मित्रयोरेकोना गायत्रं दशम्यादयस्त्रयः प्रगाथाः पुरउष्णिक् चतुर्थ्याद्या दशादित्यास्तिस्रः सौर्यः। [६७]प्रति वां दशाश्विनं तु तत्। [६८]आ शुभ्रा नव सप्ताद्या विराजः। [६९]आ वां रथोऽष्टौ। [७०]आ विश्ववारा सप्त। [७१]अप स्वसुः षट्। [७२]आ गोमता पञ्च। [७३]अतारिष्म। [७४]इमा उ वां षट् प्रागाथम्। [७५]व्युषा अष्टा उषस्यं तु वै। [७६] उदु सप्त। [७७]उपो रुरुचे षट्। [७८]प्रति पञ्च। [७९]व्युषाः। [८०]प्रति तृचम् ॥३७॥

[८१]प्रत्यु षट् प्रागाथम्। [८२]इन्द्रावरुणा दशैन्द्रावरुणं ह जागतं तु। [८३]युवां नरा। [८४]आ वां पञ्च। [८५]पुनीषे। [८६]धीराष्टौ वारुणं ह। [८७]रदत्सप्त। [८८]प्र शुन्ध्युवमन्त्या पाशविमोचनी। [८९]मो षु पञ्च गायत्रं जगत्यन्तम्। [९०]प्र वीरया सप्त वायव्यं ह्यैन्द्रश्च या

द्विवदुक्ताः । ९१कुविदङ्ग । ९२आ वायो पञ्च । ९३शुचिं न्वष्टावैन्द्राग्नं तु । ९४इयं वां द्वादश गायत्रमन्त्यानुष्टुप् । ९५प्र क्षोदसा षट् सारस्वतं तु तृतीया सरस्वते । ९६बृहदु प्रगाथः प्रस्तारपंक्तिः परास्तिस्रो गायत्र्यः सरस्वते । ९७यज्ञे दशैन्द्रचादि बार्हस्पत्यमन्त्यैन्द्री च तृतीयानवम्यावैन्द्राब्राह्मणस्पत्ये । ९८अध्वर्यव: सप्तोक्तदेवतान्त्या । ९९परो वैष्णवं तूरुमित्यैन्द्रयैश्च तिस्रः । १००नू मर्तः । ॥३८॥

